Total Pages—4

**PG/IVS/SAN-403/15**

# M.A. 4th Semester Examination, 2015

## SANSKRIT

PAPER – SAN-403 (Gr.-A & B)

*Full Marks* : 40

*Time* : 2 hours

*The figures in the right-hand margin indicate marks*

*Candidates are required to give their answers in their own words as far as practicable*

*Illustrate the answers wherever necessary*

## GROUP – A

( *Literature and Literary Criticism* )

[ *Marks* : 40 ]

1. यथाभिमतं प्रश्नद्वयस्योत्तरं प्रदेयम् — 10 × 2

(क) ध्वनितत्त्वनिरूपणे ध्वनिप्रस्थानवादिनां मतानि सम्यक् आलोच्यन्ताम् ।

( Turn Over )

(*ख*) 'ट्र्याजेडि' इत्यनेन किं बुध्यते ? अस्य अङ्गानि उल्लिख्य संस्कृतनाट्यसाहित्ये 'ट्र्याजेडि' इत्यस्य अभावविषये स्वकीयं मतमुपस्थाप्यताम् ।

(*ग*) साहित्यतत्त्वनिरूपणे रवीन्द्रनाथ-प्राचीनसंस्कृतालङ्कारिणां मध्ये तुलनात्मकम् आलोचनं प्रस्तूयताम् ।

**2.** यथाकाममेकस्य प्रश्नस्योत्तरं प्रदेयम् — 12 × 1

(*क*) 'तस्य च कारणं केवला कविगता प्रतिभा' — अत्र तस्येति पदेन कस्य बोधः ? का नाम प्रतिभा ? तस्याः हेतुः वा कीदृशः ? कवितायाः कारणतावच्छेदकत्वे कथं तस्याः केवलता सिद्धा ?

(*ख*) सोदाहरणं यथाग्रन्थं जगन्नाथस्य प्रथमकाव्यस्वरूपमुपवर्ण्यताम् ।

**3.** संस्कृतभाषया देवनागरीलिप्या च कस्याश्चिदेकस्याः पङ्क्तेः व्याख्या कार्या — 8 × 1

(*क*) रमणीयता च लोकोत्तराह्लादजनकज्ञानगोचरता ।

(*ख*) एतेन रसोद्बोधसमर्थस्यैवात्र लक्ष्यत्वमित्यपि परास्तम् ।

## GROUP – B

[ *Marks* : 40 ]

अधस्तनानां प्रश्नानां यथानिर्देशमुत्तरं प्रदेयम्

1. संशयादयः पदार्थाः प्रमाणेषु प्रमेयेषु च यथासम्भवमन्तर्भवन्तोऽपि तेषां पृथगुल्लेखे कारणं भाष्यकारदिशा उपस्थाप्यताम् । 13

*अथवा*

प्रतिपदव्यावृत्तिपुरः सरं प्रत्यक्षलक्षणं व्याख्याय "भिद्यमानस्य प्रत्यक्षज्ञानस्य नायं भिद्यत इति समानत्वान्नोक्त" — इति भाष्यवचनस्यापि तात्पर्यं व्याख्यायताम् ।

2. व्याप्तेः पूर्वलक्षणं निरूप्य "इदं ज्ञेयं वाच्यत्वात्" इति, 'सत्तावान्जातेः' चेति अनुमितिस्थलयोः सिद्धान्तलक्षणसमन्वयः प्रदर्श्यताम् । 13

*अथवा*

व्याप्तेः उत्तरपक्षलक्षणमालोच्य "द्रव्यं गुणकर्मान्यत्वविशिष्ट-सत्त्वादित्यत्र लक्षणसङ्गतिः भवति न वेति विचार्यताम् ।

3. देवनागरीलिप्या संस्कृतभाषया च समाधेयम् —

(*a*) "आप्तोपदेशः शब्दः" 7

*Or*

''प्रसिद्धसाधर्म्यात् साध्यसाधनमुपमानम् '' ।

(*b*) ''तेन साध्यवदन्यस्मिन् धूमावयवे धूमस्य समवायसम्बन्धेन सत्त्वेऽपि न क्षतिः ।'' — व्याख्यायताम् । 7

*अथवा*

''रूपत्वव्याप्यजातिमत्त्वान् पृथिवीत्वात्'' — इति स्थले अव्याप्तिं प्रदर्श्य व्याप्तेः द्वितीयलक्षणानुसारतः तन्निराक्रियताम् ।